National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 04-06
© 2026 NJHSR
www.sanskritarticle.com

मधुपर्णीदाशः
शोधच्छात्रा,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

Correspondence:
मधुपर्णीदाशः
शोधच्छात्रा,साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# बुद्धचरितसौन्दरनन्दयोः राष्ट्रचिन्तनम्

**मधुपर्णीदाशः**

**सारांशः-**

महाकविरश्वघोषः संस्कृतसाहित्यस्य प्रमुखेषु कविषु अन्यतमः। तेन विरचितबुद्धचरितम् तथा सौन्दरनन्दमहाकाव्ये केवलं धार्मिकदर्शनस्य प्रतिपादनं न, अपितु समाजस्य, राज्यस्य, प्रजायाः, नैतिकजीवनस्य तथा राष्ट्रकल्याणस्य अपि गम्भीरं चिन्तनं दृश्यते। अश्वघोषस्य राष्ट्रचिन्तनं धर्माधारितं, नैतिकमूल्यसमन्वितं च अस्ति। तस्य मते राष्ट्रस्य समृद्धिः केवलं भौतिकवैभवेन न, अपितु सदाचारेण, करुणया, न्यायेन तथा प्रजाहितेन सम्भवति।

**प्रस्तावना-**

बौद्धसाहित्यं सदैव धार्मिकसिद्धान्तानामुपरि आधारितोऽस्ति। बौद्धधर्मः समाजस्य हिताय उपदेशवचनं प्रददाति। यद्यपि बौद्धसाहित्ये राजनीतेः विषये आधिक्येन मुखरता नास्ति तथापि बौद्धदर्शनस्य प्रभावः राजनीतेः उपरि नास्ति इत्यपि वक्तुमपि न शक्नुमः। कारणं तदानीन्तनकाले बहवः राजानः बुद्धदेवस्य भक्ताः आसन् अतः राज्ञः कर्त्तव्याकर्त्तव्यादिविषये बौद्धाचार्यैः धर्मग्रन्थेषु बहुधा भणितम्। बुद्धचरितमहाकाव्यस्य प्रथमसर्गे यदा नृपः ब्राह्मणानाम् स्वपुत्रसम्बन्धितं प्रशंसावचनं श्रुत्वा आश्चर्यः सञ्जातः यत् एतादृशगुणान् सामान्ये बालके कथं भविष्यतीति। तदा ब्राह्मणाः दृष्टान्तं प्रदर्श्य तं बोधितवन्तः यत् संसारे श्रेष्ठत्वं प्राप्तुं वयवंशयोः आवश्यकता नास्ति। यथा आचार्यजनकः क्षत्रिय-कुलसम्भवत्वादपि योगविद्यायाम् आचार्यत्वम् अप्राप्नोति। अतः संसारेऽस्मिन् यः कोऽपि उन्नतस्थलं प्राप्तुम् अर्हति। कारणं ऋषयः राजानश्च तत् कर्मं कृतवन्तः यत् तेषां पितरः कर्त्तुं न अर्हाः भवन्ति। अतः तस्मात् प्रमाणं न वयो न वंशः।

**यच्च द्विजत्वं कुशिको न लेभे**
**तद्गाधिनः सूनुरवापराजन्।**
**वेलां समुद्रे सगरश्च दध्रे**
**नेक्ष्वाकवो यां प्रथमं बबन्धुः।।**[1]

**आचार्यकं योगविधौ द्विजानाम**
**प्राप्तमन्यैर्जनको जगाम।**
**ख्यातानि कर्माणि च यानि शौरेः**
**शुरादयस्तेष्वबला बभूवुः।।**[2]

**तस्मात् प्रमाणं न वयो न वंशः न**
**कश्चित् क्वचिच्छ्रैष्ठ्यमुपैति लोके।**
**राज्ञामृषीणां च हि तानि तानि**
**कृतानि पूत्रैरकृतानि पूर्वैः।।**[3] **इति**

बुद्धचरितमहाकाव्यस्य द्वितीयसर्गे राज्यस्य सप्ताङ्गानि वर्णितमस्ति। शुद्धोधन सुशासकरूपेण त्रिवर्गं प्राप्तवान्।

**एकं विनिन्ये स जुगोप सप्त सप्तैव तत्याज ररक्ष पञ्च।**
**प्राप त्रिवर्गं बुबुधे त्रिवर्गं जज्ञे द्विवर्गं प्रजहौ द्विवर्गम्।।**[4]

सौन्दरनन्दमहाकाव्यस्य प्रथमसर्गे कपिलवस्तुवर्णनप्रसङ्गे राज्यस्य स्थापनं पुनः शाक्यवंशस्य राजपुत्राणाम् औद्धत्यं तथा च कपिलमुनेः मृत्युः अनन्तरं शाक्यपुत्राणाम् औद्धत्यकारणेन तापसानां वनं परित्यज्य हिमालयं प्रतिगमनम् इत्यादिकं वर्णितमस्ति।

**तान्दृष्ट्वा प्रकृतिं यातान्वृद्धान्व्याघ्रशिशूनिव।**
**तापसास्तद्वन हित्वा हिमवन्तं सिषेविरे।।**[5]

यथा अमायां निशि चन्द्रेण विना दृश्यते तथैव अराजकराज्यस्य का स्थिति भवतीत्यस्मन् सन्दर्भे अत्र सूचना लभ्यते।

**ततः परममित्युक्त्वा शिरोभिः प्रणिपत्य च।**
**रथानारुरुहुः सर्वे शीघ्रवाहानलङ्कृतान्।।**[6]

**राज्ञः योग्यता-**

राज्ञः योग्यता सन्दर्भे अश्वघोषः स्पष्टरूपेण लिखति यत् नृपः आचारवान्, विनयी, न्यायवान्, तपस्वी, कुलीनः तथा च बुद्धिमान् स्यात्। राज्ञः आचरणम् अवश्यमेव शुद्धः भवेत् अनेन सः विशुद्धवृत्त इति कथ्यते।

**आचारवान्विनयवान्नयवान्क्रियावान्**
**धर्माय नेन्द्रियसुखाय धृतातपत्रः।**
**तद्भ्रातृभिः परिवृतः स जुगोप राष्ट्रं**
**संक्रन्दन दिवामिवानुसृतो मरुद्भिः।।**[7]

राज्ञः आचरणं वंशानुगुणं भवति अतः नृपस्य पूर्वजाः यस्मिन् मार्गे गतवन्तः तदेव मार्गं अग्रे अनुयायिनः अनुकुर्वन्ति।

**यः पूर्वैः राजभिर्यातां यियासुर्धर्मपद्धतिम्।**
**राज्यं दीक्षामिव वहन्वृत्तेनान्वगमत्पितृन्।।**[8]

सौन्दरनन्दस्य द्वितीयसर्गे अश्वघोषेन आदर्शभूपतेः सन्दर्भे आत्मनः विचारः संस्थाप्य उल्लिखितम् यत् नृपतेः आचरणं सदेव ऋषिरिव भवेत् तेन सः राजर्षि इति कथ्यते। सोभनैः आचरणैः तस्य धवलयशं दशदिशं प्रसरति। पितृणां ख्यातिः बर्द्धते। इलिविलादयः बहबः राजानः निजसत्कर्मवलेन इहलोके धवलयशं सम्प्राप्य शासनानन्तरं स्वर्गलोकं प्राप्तवन्तः पुनः क्षीणे पुण्ये मर्त्यलोकं प्रत्यागतवन्तः। अतः एतत् सर्वं कर्मणः उपरि पर्यवसति।

**राज्ञः कर्मचारीणः-**

राजसभायां राज्ञः कर्मचारीणां मध्ये सचीवामात्योः स्थानं आदौ वर्तते। राज्ञः अनन्तरं तदेव राज्यस्य महत्वपूर्णं अङ्गमासीत्। अतः अमात्यस्यापि नृपवत् गुणाः अपेक्षते। सोऽपि श्रुतविद्याविनयादिगुणैः सम्पन्नः भवेत्।

**श्रुतविनयगुणान्वितस्ततस्तं मतिसचिवः प्रवयाः पुरोहितश्च।**
**समधृतमिदमूचतुर्यथावन्न च परितप्तमुखौ न चाप्यशोकौ।।**[9]

**राजनीतिः सैन्यशक्तिश्च-**

भारतीयराजनीतौ सैन्यानां वैशिष्ट्यमस्ति। राज्यस्य अङ्गेषु सैन्यमङ्गम् एकं महत्वपूर्णं स्थानं वहति। प्रचीनग्रन्थेषु चतुरङ्गिणीसेनायाः उल्लेखोऽस्ति। अश्वघोषस्य महाकाव्येऽपि अस्मिन् प्रसङ्गे वर्णनं दृश्यते। सौन्दरनन्दमहाकाव्ये बाह्यविषयाणामुपरि अभिमानस्य निन्दाभिहितास्ति। यत् यः पुरुषः रथाश्वहस्तीभिः संयुक्तः सन् शतृणामुपरि विजयं प्राप्नोति वस्तुतस्तु सः वीरः नास्ति। तस्य वीरत्वं न विद्यते इति आशयः।

**तथा हि वीराः पुरुषा न मे मता**
**जयन्ति ये साश्वरथद्विपानरीन्।**
**यथा मता वीरतरा मनीषिणो**
**जयन्ति लोलानि षडिन्द्रियाणि ये।।**[10]

सिद्धार्थः कन्थक नामकम् अश्वं दृष्ट्वा वदति यत् नृपः त्वदुपरि आरूढ्य वहुवारं युद्धेसु शत्रुन् जितवान्। इदानीम् अहमपि तथैव अमरपदवीं प्राप्तुमिच्छामि। एवं प्रकारेण युद्धे अश्वसैन्यानां सञ्चालनम् आसीत्।

**द्विविधा समुदेति वेदना नियतं चेतसि देह एव च।**
**श्रुतविध्युपचारकौविदा द्विविधा एव तयोचिकित्सकाः।।**[11]

अश्वघोषेन सिद्धार्थस्य अभिनिष्क्रमणप्रसङ्गे उक्तं यत् दुर्गस्य यत् विशालं द्वारं गजानां वलप्रयोगेण उद्घाव्यते तत् राजकुमाराणाम् आगमनेन स्वयमेव उद्घाटितो भवति। अस्मात् गजारोहणविद्यायाः प्रचलनम् आसीत् इति ज्ञायते।

**गुरुपरिघकपाटसंवृता या न सुखमपि द्विरदैरपाव्रियन्ते।**
**व्रजति नृपसुते गतश्वनास्ताः स्वयमभवन्विवृताः पुरःप्रतोल्यः।।**[12]

युद्धे प्रयुक्तानाम् आयुधानां विषये वर्णनं बहुधा उपलभ्यते। राज्ये कोशनिर्माणाय सर्वे प्रजाः करः प्रयच्छन्ति स्म। शुद्धोदनस्य विषये सौन्दरनन्दे उच्यते यत् सः अनुचितकरः न गृह्णाति स्म। इतोऽपि प्रजान् न पीडयति स्म।

**आर्थिकजीवनम्-**

प्रचीनकालादेव समाजस्य उत्कर्षः मानवजीवनस्योपरि पर्यवसितासीत्। यद्यपि समयानुसारं मानवस्य अर्थव्यवस्था अपेक्षानुगुणं परिवर्त्तितो भवति, तथापि कृषिकार्यं वाणिज्यञ्च अर्थस्य मूलाधाररूपेण आस्ताम्। चतुर्वर्गेषु अर्थः द्वितीयस्थानं वहति। अतः भारतीयधर्मशास्त्रीणः नैकेषु शास्त्रेषु अर्थसम्बन्धे आलोचितवन्तः। अतः "अर्थस्य पुरुषो दासः" इति उच्यते। भारतीयअर्थशास्त्रे वार्त्ता शब्दस्य प्रयोगः दृश्यते। कौटिल्यार्थशास्त्रे कृषिपशुपालनंवाणिज्यञ्च वार्त्ता इति कथ्यते। **"कृषिः पशुपाल्या वाणिज्या च वार्ता"**।[13] महाभारते उच्यते यत् अनेन संसारस्य पोषणं भवति अतः एतदेव जगतः मूलमस्ति। अश्वघोषस्य समये भारतीय अर्थव्यवस्थायाः क्रमशः विकाशो अभवत्। तदानीन्तनकाले क्षत्रस्य कर्षणं हलेन वृषभसहायेन एव भवति। शश्यकर्त्तनान्तरं शश्यमण्डपे तस्य स्थापनं भवति। इतोपि फलानां औषधिनामपि उत्पादनम् आसीत्। **माताभूमि पुत्रोऽहं पृथीव्याः**[14] इति अथर्ववेदस्य वचनानुरूपं माताभूमिः वसुन्धरा भवति। पृथिव्याः उपरि विद्यमानाः वृक्षाः अधः तैलरत्नानिधातवश्च एतत् सर्वं मानवस्य अर्थिकविकाशाय सहायकाः भवन्ति स्म। अतः अर्थप्राप्त्यर्थं जनाः अस्याः वसुन्धरायाः दोहनं कृत्वा निजोपयोगीपदार्थानां संग्रहणं कुर्वन्ति। तथा न क्रियते चेत् जनाः इहलोके परलोके च शान्तिं न प्राप्नुवन्ति। बुद्धदेवः स्वयमेव

कथयति यत् मानवस्य लोकयात्रायां धनं अवश्यमेव अपेक्षते। यतोहि भोजनेन विना तस्य आध्यात्मिकी उन्नतिरपि न सम्भवति।

**क्षुत्पिपासाश्रमक्लान्तः श्रमादश्वस्थमानसः।**
**प्राप्नुयान्मनसावाप्यं फलं कथमनिर्वृतः।।**[15]
**तस्मादाहारमूलोऽयमुपाय इति निश्चयः।**
**आहारकरणे धीरः कृत्वामितमतिर्मतिम्।।**[16]

अस्मात् ज्ञायते यत् तदानीन्तनकाले भारतीयसमाजस्य आर्थिकी स्थिति सुदृढा आसीत्।

**कृषिकार्यम्**

अभिनिष्क्रमणप्रसङ्गे सिद्धार्थः कृषिक्षेत्रे वायुना आतपेन रजोभिश्च विवर्णमुखान् कृषकान् तथा च कृषिकार्यसमये जीर्णान् पशून् दृष्ट्वा मनसि करुणा प्रकटयामास।

**कृषतः पुरुषाँश्च वीक्षमाणः पवनार्कांशुरजोविभिन्नवर्णान्।**
**वहनक्लमविक्लवांश्च धुर्यान् परमार्यः परमां कृपां चकार।।**[17]

राज्ञः स्तूतिगानसन्दर्भे अश्वघोषः वर्णयति यत् तस्मिन् राज्ये राज्ञः एतादृशः प्रतापः आसीत् यत् श्रमं विनाऽपि वसुधा शस्यश्यामला दरीदृश्यते। अतः बहु शस्योत्पन्नासीदिति भावः। क्षेत्रे बीजवपनार्थं समुचितसमयः निर्द्धारितासीत्। बीजाङ्कुरोद्गमे ऋतुभूमिजलश्च त्रिणि कारणाणि सन्ति। एतेषां विना बीजाङ्कुरे विकृति परिलक्षते।

**ऋतुभूम्यम्बुविरहाद्यथा बीजं न रोहति।**
**रोहति प्रत्ययैस्तैस्तैस्तद्वत् सोऽपि मतो मम।।**[18]

तदानीन्तनकाले विविधाः शस्याः सम्भवन्ति तद्यथा ईक्षुः, कार्पासः,चणकः,तिलम्, तण्डुलम्, मसूरः, मुद्गः, व्रीहिः,सर्षपादयः क्षेत्रे सम्भवन्ति। वने उद्याने च कदलीफलम्, बदरीकाफलम्, वनस्पतयश्च उत्पद्यन्ते। एतानि द्रव्याणि मानवजीवनस्यार्थिकप्रगतये सहायकाः भवन्ति स्म।

**पशुपालनम् -**

साधारणतया जनाः कृषिकार्यनिमित्तं पशुपालनं कुर्वन्ति स्म। गृहपालितजन्तुषु धेनोः महत्वमधिकम् आसीत्। जनाः सोत्साहेन गोदानं कुर्वन्ति स्म।

**अपि च शतसहस्त्रपूर्णसंख्याः स्थिरबलवत्तनयाः सहेमशृङ्गीः।**
**अनुपगतजराः पयस्विनीर्गाः स्वयमददात्सुतवृद्धये द्विजेभ्यः।।**[19]

शकटयानस्य प्रचलनं बहुधा आसीत्। दुग्धनिमित्तं गोमहिषादिपशूनां पालनं भवति। काश्चन पशवः मांसार्थं परिपाल्यते यथा हरिणः छागादयः। चर्मनिमित्तं व्याघ्रादीनां हननं भवति। परिवहनाय उष्ट्रगर्दभादीनां परिपालनमासीत्।

**वाणिज्यम्-**

कपिलवस्तुनगरे वहवः वणिजकाः निवसन्ति स्म। ते सर्वे बुद्धदेवं मार्गे दृष्ट्वा प्रणमाञ्जलिं विज्ञापयन्ति आसीत्।

**अथावतीर्याश्वरथद्विपेभ्यः शाक्या यथास्वर्द्धि गृहीतवेषाः।**
**महापणेभ्यो व्यवहारिणश्च महामुनौ भक्तिवशात्प्रणेषुः।।**[20]

एवं प्रकारेण बुद्धचरितसौन्दरनन्दयोः राष्ट्रचिन्तनं प्रतिपादितमस्ति।

**उपसंहारः –**

अश्वघोषविरचितयोः बुद्धचरितसौन्दरनन्दमहाकाव्ययोः राष्ट्रचिन्तनं अत्यन्तं व्यापकं, मानवीयं, नैतिकं च अस्ति। तत्र धर्मः, न्यायः, करुणा, अहिंसा, प्रजाहितम्, सुशासनम्, समता, नैतिकजीवनम् इत्यादीनि राष्ट्रस्य स्थैर्यसमृद्ध्योः आधारभूतानि तत्त्वानि प्रतिपादितानि। एते विचाराः आधुनिककालेऽपि राष्ट्रनिर्माणे, सामाजिकसौहार्दे तथा विश्वशान्तिस्थापने अत्यन्तं प्रासङ्गिकाः सन्ति।

**सन्दर्भग्रन्थसूची-**

1. बुद्धतरितम्(हिन्दी-रूपान्तरसहितम्) ,हिन्दी-अनुवादकः- स्वामी द्वारकादासशास्त्री, सम्पादकः- डा. श्रीकान्तपाण्डेयः,प्रकाशकः- चौखम्बा संस्कृत सीरीज अफिस(वाराणसी), संस्करण-2018
2. सौन्दरनन्दं महाकाव्यम्, व्याख्यादिप्रणेता सम्पादकश्च(डा. रमाशङ्कर त्रिपाठी), प्रकाशकः – कृष्णदास अकादेमी वाराणसी, संस्करण – 1992
3. अश्वघोष की काव्य-कृतियों का सांस्कृतिक अध्ययन, लेखिका- डा. नीलम राय, प्रकाशन- जानकी प्रकासन (पटना, नई दिल्ली), प्रकाशकः – नन्द किशोर सिंह, प्रथम संस्करण- 2000

**पाद टिप्पणी**

1. बुद्धचरितम् 1.44
2. तदेव 1.45
3. तदेव 1.46
4. तदेव 2.41
5. सौन्दरनन्द 1.37
6. तदेव 1.30
7. सौन्दरनन्द 1.62
8. तदेव 2.6
9. बुद्धचरित 8.82
10. सौन्दरनन्द 9.23
11. तदेव 8.3
12. बुद्धचरितम् 5.82
13. कौटिल्यार्थशास्त्र 1.4
14. पृथिवीसूक्त
15. बुद्धचरितम् 12.103
16. तदेव 12.107
17. तदेव 5.6
18. तदेव 12.72
19. तदेव 1.84
20. सौन्दररन्द 5.1